शब्दरूपाश्रया चेयं द्विलिङ्गता क्वचिदर्थभेदेनापि व्यवतिष्ठते, यथा – पद्मशङ्खशब्दौ निधिवचनौ पुंलिङ्गौ, जलजे [1]उभयलिङ्गौ । भूतशब्दः पिशाचे उभयलिङ्गः, क्रियाशब्दस्याभिधेयवल्लिङ्गम् । सैन्धवशब्दो लवणे उभयलिङ्गः, यौगिकस्याभिधेयवल्लिङ्गम् । सारशब्द उत्कर्षे पुंलिङ्गः, न्यायादनपेते [2]नपुंसकम्, नैतत् सारम् इति । धर्मः इत्यपूर्वे पुंलिङ्गः, तत्साधने [3]नपुंसकम् । 'तानि धर्माणि प्रथमान्यासन्' (ऋ. १.१६४.४३) ।

अर्धर्च । गोमय । [4]कषाय । [5]कार्षापण । कुतप । कपाट । शङ्ख । [6]चक्र । गूथ । यूथ[7] । ध्वज । कबन्ध । पद्म । गृह । [8]सरक । कंस । दिवस । यूष । अन्धकार । [9]दण्ड । कमण्डलु । मण्ड । भूत । द्वीप । द्यूत । चक्र । धर्म । कर्मन् । मोदक । शतमान । [10]यान । नख । नखर । चरण । पुच्छ । दाडिम । हिम । रजत । सक्तु । पिधान । सार । पात्र । घृत । सैन्धव । औषध । आढक । चषक । द्रोण । खलीन । पात्रीव । षष्टिक । वार । बाण । प्रोथ । कपित्थ । शुष्क । [11]शील । शुल्ब । सीधु । कवच । रेणु । कपट । [12]सीकर । मुसल । सुवर्ण । यूप । चमस । वर्ण । क्षीर । कर्ष[13] । आकाश । अष्टापद । मङ्गल । निधन । निर्यास । जृम्भ । [14]वृत्त । पुस्त । क्ष्वेडित । शृङ्ग । [15]शृङ्खल । मधु । मूल । मूलक । शराव । शाल । वप्र । विमान । मुख । प्रग्रीव । शूल । वज्र । कर्पट । शिखर । कल्क । नाट । मस्तक । वलय । कुसुम । तृण । पङ्क । कुण्डल । किरीट । अर्बुद । अङ्कुश । तिमिर । आश्रम । भूषण । इल्वस । मुकुल । वसन्त । तडाग । पिटक । विटङ्क । माष । कोश । फलक । दिन । दैवत । पिनाक । समर । स्थाणु । अनीक । उपवास । शाक । कर्पास । चषाल । खण्ड । दर । विटप । रण । बल । मल । मृणाल । हस्त । सूत्र । ताण्डव । गाण्डीव । मण्डप । पटह । सौध । पार्श्व । शरीर । फल । छल । पुर । राष्ट्र । विश्व । अम्बर । कुट्टिम । मण्डल । ककुद । तोमर । तोरण । मञ्चक । पुङ्ख । मध्य । बाल । वल्मीक । वर्ष । वस्त्र । देह । उद्यान । उद्योग । स्नेह । स्वर । सङ्गम । निष्क । क्षेम । शूक । छत्र । पवित्र । यौवन । पानक । मूषिक । वल्कल । कुञ्ज । विहार । लोहित । विषाण । भवन । अरण्य । पुलिन । दृढ । आसन । ऐरावत । शूर्प । तीर्थ । लोमश । तमाल । लोह । दण्डक । शपथ । प्रतिसर । दारु । धनुस् । मान । तङ्क । वितङ्क । मव । सहस्र । ओदन । प्रवाल । शकट । अपराह्ण । नीड । शकल । इति अर्धर्चादिः ॥

## इदमोऽन्वादेशेऽशनुदात्तस्तृतीयादौ । (३२/३५०)

आदेशः कथनम् । अन्वादेशोऽनुकथनम् । इदमोऽन्वादेशविषयस्याशादेशो भवत्यनुदात्तः,[16]तृतीयादौ विभक्तौ परतः । आभ्यां छात्राभ्यां रात्रिरधीता, अथो आभ्यामहरप्यधीतम् । अस्मै छात्राय कम्बलं देहि, अथोऽस्मै शाटकमपि देहि । अस्य छात्रस्य शोभनं शीलम्, अथोऽस्य [17]प्रभूतं स्वम् । [18]अशादेशवचनं साकच्कार्थम् (म. भा. १.४८१) । इमकाभ्यां छात्राभ्यां रात्रिरधीता, अथो आभ्यामहरप्यधीतम् । [19]नेह पश्चादुच्चारणमात्रमन्वादेशः । किं तर्हि? एकस्यैवाभिधेयस्य [20]पूर्वं शब्देन प्रतिपादितस्य द्वितीयं प्रतिपादनमन्वादेशः । तेनेह न भवति, देवदत्तं भोजय, इमं [21]च यज्ञदत्तम् (म. भा. १.४८०) इति ॥

---

1. द्विलिङ्गौ क. 2. नपुंसकलिङ्गः अ. क. 3. नपुंसकः क, नपुंसकलिङ्गः अ. 4. वर्ष ह. 5. कार्षापण – खलीन नास्ति क. 6. कवच क. 7. पशु इत्यधिकम् ह. 8. सारक ड. 9. दण्डक ड. 10. पान ड. 11. नास्ति क. 12. शिखर क, मुसल नास्ति क. 13. करीष, यष्टक, निष्क इत्यधिकम् क. 14. मुस्त, मुस्तक पुस्तक क, बुस्त ड. 15. नास्ति ड. 16. तृतीयादेः विभक्तेः ह. 17. प्रभूतमपि क. ड, स्वम् नास्ति ह. 18. आदेश° ह. 19. नेह–आदेशः नास्ति फ. 20. पूर्वशब्देन ड. 21. च नास्ति क.